# सर्गवैचित्र्यम्।

**Que.1. मातृभाषायां विवर्तयत।** **[Marks :(5)]**

**मलाला यूसफ् साई 1997 तमे वर्षे पाकिस्थान् देशे जाता । सा बालिकानां विद्याभ्यासाय प्रयत्नं कृतवती। 2012 तमे वर्षे आतङ्कवादि नाम् आक्रमेण सा क्षता जाता। एकया लेखन्या विश्वं परिवर्तयितुं शक्यते सा उदघोषयत् 2014 तमे वर्षे सा नोबल् पुरस्कारेण आदृता अभवत्।**

**Ans.** मातृभाषायां विवर्तयत।

यथायोग्यं विवर्तनं करोति चेत् पूर्णाङ्कः।

**Que.2. प्रदत्तां खण्डिकां पठित्वा प्रश्नानामुत्तराणि लिखत।** **[Marks :(4)]**

**आङ्गलसाहित्यमण्डले विश्वप्रसिद्धः भवति षेक्स्पियर्। तेन विरचितं प्रसिद्धं नाटकं भवति ओथल्लो। अस्यां कथायां नायकः ओथल्लः,नायिका डेस्डिमोणा च। ओथल्लः आफ्रिक्कादेशात् आगतः मूर् वंशीयः आसीत्। सः उदारः शूरः सुशीलः च आसीत्। सः बब्रान्सियस्य पुत्री डेस्डिमोणा तस्मिन् अनुरागवती अभूत्।तं परिणीता च।**

**क. आङ्गलसाहित्यमण्डले विश्वप्रसिद्धः कः ?**

**ख. षेक्स्पियर् महाशयेन विरचितं प्रसिद्धं नाटकं किम् ?**

**ग. ओथल्लो नामके नाटके नायिका का ?**

**घ. ओथल्लस्य स्वभावः कीदृशी आसित् ?**

**ङ. ओथल्लः कां परिणीतवान् ?**

**Ans.** प्रदत्तां खण्डिकां पठित्वा प्रश्नानामुत्तराणि लिखत।

क. षेक्सपियर्।

ख. ओथल्लो।

ग. डेस्डिमोणा।

घ. ओथल्लो उदारः शूरः सुशीलः च।

ङ. डेस्डिमोणा।

**Que.3. खण्डिकां पठित्वा प्रश्नानाम् उत्तराणि लिखत।** **[Marks :(4)]**

**१ कस्यचन गृहस्य परिसरे काचित् अलाबुलता आसीत्। तस्यां बहूनि फलान्यपि आसन्। तत्समीपे आकाशे हरितानि पर्णानि विस्तार्य नारिकेलवृक्षाः अप्यासन्। तान् दृष्ट्वा कदाचित् अलाबुलता एवमचिन्तयत् - एषः वृक्षः उज्वलं सूर्यप्रकाशं शुद्धवायुं चानुभूय सानन्दं तिष्ठति। मया तु जनानां पादाघातैः महान् क्लेशः अनुभूयते।**

**१ गृहस्य परिसरे कः आसीत्?**

**२ नारीकेलवृक्षान् दृष्वा अलाबुलता किमचिन्तयत्?**

**३ खण्डिकातः लङ् रूपाणि चित्वा लिखत।**

**४ रेखाङ्कितं पदं विश्लेषयत।**

**२. प्रकृतिः तस्याः प्रार्थनाम् अङ्गीकृतवती। अन्येद्युः प्रभाते सा लता नारिकेलवृक्ष इव उन्नतीं प्राप्ता। यथेच्छं सूर्यप्रकाशं शुद्धवायुं च अनुभूय तोषमपाव। परं फलानां भारं वोढुमशक्ता अलाबुलता भूमौ अपतत्। सर्वाणि फलानि विदीर्णानि अभवन्।अलावुलता नितरां शोकाकुला अभवत्।**

**१. प्रकृतिः कस्याः प्रर्थनाम् अङ्गीकृतवती?**

**२. अलाबुलता किमर्थं तोषमवापा?**

**३. अलाबुलता कथं भूमौ अपतत्?**

**४. अलाबुलता किमर्थं शोकाकुला अभवत्?**

**५. खण्डिकातः तुमुन्नन्त- ल्यबन्तमव्ययानि चित्वा लिखत।**

**Ans.** प्रश्नानाम् उत्तराणि लिखत।

I 1. अलाबुलता।

2. एषः वृक्षः उज्वलं सूर्यप्रकाशं शुद्धवायुश्च अनुभूय सानन्दं तिष्ठति।

3. आसीत्, आसन्, अचिन्तयन्।

4. फलानि +अपि।

II

1. तस्याः/अलाबुलतायाः।

2. यथेच्छं सूर्यप्रकाशं शुद्धवायुं च अनुभूय तोषमवाप।

3. परं फलानां भारं वोढुमशक्ता अलाबुलता भूमौ अपतत्।

4. सर्वाणि फलानि वितीर्णानि अभवन्। अलाबुलता नितरां शोकाकुला अभवत्।

5. अनुभूय, वोढुम्।

**Que.4. सूचकानि उपयुज्य टिप्पणीं लिखत** **[Marks :(4)]**

**सूचनाः - प्रकृतिसृष्टिः ---- सर्गवैचित्र्यं----विभिन्नः स्वभावः---- विभिन्नगुणाः ----अतिलोभो अनर्थाय।**

**Ans.** सूचकाः उपयुज्य टिप्पणीं लिखत।

क्रमशः लेखनम्।

आशयपूर्णता।

भाषाशैलीम्।

**Que.5. कोष्ठकात् पदानि स्वीकृत्य संभाषणांशं पूरयत।** **[Marks :(4)]**

**(कीदृशी,धन्यवादः,किम्,उन्नतीं )**

**अलाबुलता - मातः! पश्यतु मम दारुणावस्थाम्।**

**प्रकृतिमाता - पुत्री -----अवस्था।**

**अलाबुलता - मया तु जनानां पादाघातैः महान् क्लेशः अनुभूयते।**

**प्रकृतिमाता - पुत्री ----- आवश्यकम्।**

**अलाबुलता - माता मामपि नारिकेलवृक्ष इव ----- प्रापयतु।**

**प्रकृतिमाता - तथास्तु।**

**अलाबुलता ------ ।**

**Ans.** कोष्ठकात् पदानि स्वीकृत्य सम्भाषणांशं पूरयत।

1) कीदृशी

2) किम्

3) उन्नतीं

4) धन्यवादः

**Que.6. रेखाङ्कितानि पदानि उत्तरत्वेन लब्धुमर्हान् प्रश्नान् लिखत।** **[Marks :(1)]**

**१. प्रभाते अलाबुलता नारीकेलवृक्ष इव उन्नतिं प्राप।**

**२. अलाबुलता प्रकृतिमातरं प्रार्थयत।**

**३. हरितानि पर्णानि विस्तार्य नारिकेलवृक्षाः आसन्।**

**Ans.** रेखाङ्कितानि पदानि उत्तरत्वॆन लब्धुमर्हान् प्रश्नान् लिखत।

1) प्रभाते का नारीकेलवृक्ष इव उन्नतिं प्राप ?

2) अलाबुलता कां प्रार्थयत ?

3) हरितानि पर्णानि विस्तार्य के आसन् ?

**Que.7. प्रदत्तानि वाक्यानि पठित्वा क्त्वान्तमव्ययं चित्वा लिखत।** **[Marks :(1)]**

**क)**

**१) अलाबुलतायाः प्रार्थनां श्रुत्वा प्रकृतिमाता सन्तुष्टा अभवत्।**

**२) नारीकेलवृक्षान् दृष्ट्वा कदाचित् अलाबुलता एवमचिन्तयत्।**

**ख)**

**क्त्वान्तं, ल्यबन्तं, तुमुन्नन्तं ,अन्यानि च विविच्य पट्टिकां पूरयत।**

**(श्रुत्वा, विस्तार्य, पठितुम्, एव, इव, च ,पुनः, अपि, दृष्वा, गन्तुम् अनुभूय)( पठित्वा, अपि, अनुभूय, कदाचित्, विस्तार्य)**

| **क्त्वान्तं** | **ल्यबन्तं** | **तुमुन्नन्तं** | **अन्यानि** |
|---|---|---|---|
| | | | |

**Ans.** प्रदत्तानि वाक्यानि पठित्वा क्त्वान्तमव्ययं चित्वा लिखत।

क) श्रुत्वा

ख) दृष्ट्वा

ख) क्त्वान्तम् ल्यबन्तं तुमुन्नन्तं अन्यानि च विविच्य पट्टिकां पूरयत।

क)

| क्त्वान्तम् | ल्यबन्तं | तुमुन्नन्तं | अन्यानि |
|---|---|---|---|
| श्रुत्वा | वीस्तार्य | पठितुम् | एव |
| दृष्ट्वा | अनुभूय | गन्तुम् | इव |
| पठित्वा | | द्रष्टुम् | च |
| | | | पुनः |
| | | | अपि |
| | | | कदाचित् |

**Que.8. संबोधनरूपं चित्वा लिखत।** **[Marks :(1)]**

**१. मातः ! मया यत् प्रार्थितं तदनुचितमेव।**

**२. मातः! मामपि नारिकेलवृक्ष इव उन्नतिं प्रापयतु।**

**३. अम्बे !क्षम्यताम्। इतः परं सन्तोषेण एव भवावः।**

**४. सीते !भवति भोजनं कृत्वा कुत्र गच्छसि।**

**५. जात! सुयोधन! देहि मे प्रतिवचनम्।**

**६. पुत्र ! किमर्थमागतः।**

**७. रमेश ! त्वं कदा उत्तिष्ठसि।**

**८. रमे ! किं करोति भवति।**

**९. महेश ! भवान् संङ्गणकज्ञानं कुतः प्राप्तवान्।**

**II उदाहरणानुसारं संबोधनरूपं सिखत।**

**क) उदाः रामः - राम।**

**रहीमः - -----------------।**

**बालः - -----------------।**

**कृष्णः - -----------------।**

**रमेशः - -----------------।**

**माधवः - -----------------।**

**जोसफः - -----------------।**

**ख**

**आमिना - आमिने**

**लता - -----------------।**

**रमा - -----------------।**

**सीता - -----------------।**

**माला - -----------------।**

**Ans.** संबोधनारूपम् चित्वा लिखत।

मातः !

मातः!

अम्बे !

सीते !

जात!

पुत्र !

रमेश !

रमे !

महेश !

क) हे रहिम्।

हे बाल।

हे कृष्ण।

हे रमेश।

हे माधव।

हे जोसेफ्।

ख) हे लते।

हे रमे।

हे सीते।

हे माले।

**Que.9. उदाहरणानुसारं लिखत।** **[Marks :(1)]**

**उदाः सानन्दम् - आनन्देन सह वर्तते**

**सामोदम् - -----------------।**

**साश्चर्यम् - -----------------।**

**Ans.** उदाहरणानुसारं लिखत।

आमोदेन सह वर्तते।

आश्चर्येण सह वर्तते।

**Que.10. यथोचितं योजयत** **[Marks :(4)]**

**क) भवनम् - सन्तोषः**

**वृक्षः - गृहम्**

**अरण्यम् - पादपः**

**तोषः - वनम्**

**ख) विदीर्णम् - भुवनम्**

**विश्वम् - भग्नम्**

**युक्तिः - भेकः**

**मण्डूकः – उपायः**

**Ans.** यथोचितं योजयत।

क) गृहम्।

पादपः।

वनम्।

सन्तोषः।

ख) भग्नम्।

भुवनम्।

उपायः।

भेकः।

**Que.11. उदाहरणानुसारं पदानि विश्लेषयत** **[Marks :(3)]**

**१ अप्यासन् - अपि+ आसन्**

**फलान्यपि -.........+ .........**

**बहून्यपि -.........+ .........**

**इत्यपि -.........+ .........**

**२ आहुरपि -.........+ .........**

**मुहुरपि -.........+ .........**

**प्रातरत्र -.........+ .........**

**Ans.** उदाहरणानुसारं लिखत।

१ फलानि + अपि।

बहूनि+ अपि।

इति+ अपि।

२ आहुः+ अपि।

मुहुः+ अपि।

प्रातः+ अत्र।

**Que.12. कोष्ठकात् समुचितमुत्तरं चित्वा लिखत।** **[Marks :(1)]**

**१. सर्वेषामपि जीविनां सृष्टेः फलं जगत्कल्याणमेव -कस्याः वचनमिदम्।**

**(अलाबुलतायाः, नारिकेलवृक्षस्य , सूर्यस्य , प्रकृतिमातुः)**

**२. मातः मामपि नारिकेलवृक्ष इव उन्नतिं प्रापयतु। कस्याः वचनम् इदम्?**

**( अलाबुलतायाः, नारिकेलवृक्षस्य , सूर्यस्य , प्रकृतिमातुः)**

**३. मया इति कस्मिन् विभक्तौ रूपम्?**

**( प्रथमा, द्वितीया, तृतीया, चतुर्थी)**

**४. दृष्ट्वा इति कीदृशम् अव्ययम्?**

**(क्त्वान्तम्, ल्यबन्तम्, तुमुन्नन्तम्, अन्यानि)**

**५. प्रकृतिः कस्याः प्रार्थनाम् अङ्गीकृतवती।?**

**(अलाबुलतायाः, नारिकेलवृक्षस्य , सूर्यस्य , चन्द्रस्य)**

**६. आसन् - इत्यत्र लकारः कः?**

**(लट्, लङ्. लिट्, लिङ्)**

**७. तिष्ठति -इत्यत्र लकारः कः?**

**(लट्, लङ्. लिट्, लिङ्)**

**Ans.** कोष्ठकात् समुचितमुत्तरम् चित्वा लिखत।

1) प्रकृतिमातुः।

2) अलाबुलातायाः।

3) तृतीया।

4) क्त्वान्तम्।

5) अलाबुलतायाः।

6) लङ्।

7) लट्।